Brain International School
Vikas Puri, New Delhi

# पुनरावृत्ति

**विषय ः संस्कृत** **कक्षा -अष्ट** **अर्धवार्षिक परीक्षा**

**प्रश्न 1 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

परोपकारशीलाः जनाः विश्वस्य कल्याणस्य कार्यं कुर्वन्ति।ते परेषाम् उपकाराय घोरतरं कष्टं सहन्ते।यथा दानशीलः कर्णः स्व कवचकुण्डले अयच्छत्। राजा शिवि कपोतस्य प्राणान् रक्षितुम् निजमांसम् अयच्छत्। दधीचिः देवानां रक्षायै निजशरीरम् अपि अयच्छत्।

(क) **एकपदेन उत्तरत ।**

1) कीदृशाः जनाः विश्वस्य कल्याणस्य कार्यं कुर्वन्ति ?

2) कः देवानां रक्षायै निजशरीरम् अपि अयच्छत् ?

(ख) **पूर्णवाक्येन उत्तरत।**

1) राजा शिविः किमर्थम् स्वमांसम् अयच्छत्?

(ग) **निर्देशानुसारम् उत्तरत।**

1) **'जनाः'** अत्र विशेषणपदम् किम्? (विश्वस्य/कल्याणाय/परोपकारशीलाः)

(घ) **अर्थम् लिखत।**

1) अयच्छत्( देना/ दिया /देना चाहिए)

**प्रश्न 2. चित्रम् आधृत्य पंचानि वाक्यानि लिखत।सहायतार्थम् पदानि मञ्जूषायाम् दत्तानि सन्ति।**



**अस्ति, बालकः , तुलसी ,पादपः ,पुष्पाणि, यच्छति, वयम् ,लाभदायकः , बालिका**

**प्रश्न 3 मञ्जूषासहायताम् अधोलिखितवार्त्तालापम् पूरयत।**

भ्राता - (हर्षेण सहितम्)हे भगिनि ! भगिनि!
भगिनी - किम् -किम् ? किमर्थम् अति 1................. असि।
भ्राता - श्वः अहं मुगल उपवनं गमिष्यामि।
भगिनी - केन सह?
भ्राता - विद्यालयस्य छात्रैः2 ................. च सह।
भगिनी - वाह!वसन्तकाले तु मुगल उपवनस्य 3................. अवर्णनीया।
भ्राता - आम्।मम अध्यापिकया अपि एतत् 4.................।
भगिनी - त्वं श्वः कतिवादने .................
भ्राता - प्रातः नववादने।

| |
|---|
| **शोभा ,प्रसन्नः, अध्यापिकया ,गमिष्यसि ,कथितम** |

**प्रश्न 4 प्रश्ननिर्माणं कुरुत।**

**1 शिरसि वज्रपातः अभवत्। 2 लताः क्षीणाः दुर्बलाः च सन्ति। 3 पशवः इतस्ततः अधावन्।**
**4 संविधानं चित्रैः सज्जितः अस्ति। 5 श्री वसन्तः कृष्णः भारतस्य हिन्दी संविधानं अलिखत्।**

**प्रश्न 5** पाठांशम् पठित्वा तदाधारितान् प्रश्नान् उत्तरत ।

आसीत् कश्चित् चञ्चलो नाम व्याधः। पक्षिमृगादीनां ग्रहणेन सः स्वीयां जीविका निर्वाहयति स्म॥ एकदा सः वने जालं विस्तीर्य गृहम् आगतवान्। अन्यस्मिन् दिवसे प्रात:काले यदा चञ्चलः वनं गतवान् तदा सः दृष्टवान् यत् तेन विस्तारिते जाले दौर्भाग्याद् एकः व्याघ्रः बद्धः आसीत्। सोऽचिन्तयत् 'व्याघ्रः मां खादिष्यति अतएव पलायनं करणीयम्।'

एकपदेन उत्तरत- (एक पद में उत्तर दीजिए-)

1 चञ्चलो नाम कः आसीत्..........................।
2 सः केषां ग्रहणेन जीविका निर्वाहयति स्म ..........................।
3 सः वने किं विस्तृतवान्ॠ ..........................।
4 व्याघ्रः कस्मिन् बद्धःॠ ..........................।

पूर्णवाक्येन उत्तरत-(पूर्ण वाक्य में उत्तर दीजिए-)

1 व्याधः कदा व्याघ्रं जाले बद्धम् दृष्टवान् ..........................।
2 व्याघ्रं बद्धं दृष्ट्वा व्याधः किम् अचिन्तयत् ..........................।

भाषिककार्यम्-(भाषा-कार्य)

'आसीत् कश्चित् चञ्चलो नाम व्याधः' इति वाक्ये

1. 'आसीत्' क्रियापदस्य कर्ता कः? ..........................(कश्चित्, चञ्चल, व्याधः)

2. 'एकः व्याघ्रः'-अत्र किं विशेषणम्? ..........................

3. पर्यायम् लिखत-अरण्ये = ..........................

4. विभक्तिवचनम् लिखत्

(i) दौर्भाग्यात् = .......................... ..........................

प्रश्न 6 पाठांशम् पठित्वा तदाधारितान् प्रश्नान् उत्तरत।

**मैत्री मे सहजा प्रकृतिरस्ति, नो दुर्बलतायाः पर्यायः।**
**मित्रस्य चक्षुषा संसार, पश्यन्ती भारतजनताऽहम्॥**

I. एकपदेन उत्तररत-

(i) मैत्री कस्याः सहजा प्रकृतिः अस्ति?

(ii) भारतजनतायाः दुर्बलता का नास्ति?

II. पूर्णवाक्येन उत्तरत-(पूर्ण वाक्य में उत्तर दीजिए)

(i) का मित्रस्य चक्षुषा संसारं पश्यति?

(ii) भारतस्य जनतायाः सहजा प्रकृतिः का वर्तते?

III. भाषिक कार्यम्-(भाषा–कार्य)

(i) श्लोके 'मित्रता' पदस्य कः पर्यायः आगतः?

(क) सहजा (ख) मे (ग) मैत्री (घ) प्रकृतिः

(ii) अत्र श्लोके 'पश्यन्ती' इत्यस्य विशेषणस्य विशेष्यः कः?

(क) भारतजनता(ख) अहम्(ग) भारतजनताऽहम् (घ) चक्षुषा

(iii) 'सबलतायाः' इत्यस्य पदस्य कः विपर्ययः अत्र श्लाके प्रदत्तः?

(क) दुर्बलतायाः(ख) दुर्बलता(ग) सहजी (घ) प्रकृतिः

(iv) श्लोके 'अस्ति' इत्यस्याः क्रियायाः कर्तृपदं किमस्ति?

(क) मैत्री(ख) प्रकृतिः(ग) में(घ) सहजा